শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ২

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে কৃষ্ণায পরব্রহ্মণে নমঃ
শ্রীমতে রামানুজায নমঃ

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ২

### ভগৱদ্রূপৱর্ণনম্

সূর্যস্পর্ধিকিরীটমূর্ধ্বতিলকপ্রোদ্ভাসিফালান্তরং
    কারুণ্যাকুলনেত্রমার্দ্রহসিতোল্লাসং সুনাসাপুটম্।
গণ্ডোদ্যন্মকরাভকুণ্ডলযুগং কণ্ঠোজ্বলতকৌস্তুভং
    ত্বদ্রূপং ৱনমাল্যহারপটলশ্রীৱতসদীপ্রং ভজে॥ ১ ॥

কেযূরাঙ্গদকঙ্কণোত্তমমহারত্নাঙগুলীযাঙ্কিত-
    শ্রীমদবাহুচতুষ্কসঙ্গতগদাশঙ্খারিপঙ্কেরুহাম্।
কাঞ্চিত্ কাঞ্চনকাঞ্চিলাঞ্ছিতলসতপীতাম্বরালম্বিনী-
    মালম্বে ৱিমলাম্বুজদ্যুতিপদাং মূর্তিং তৱার্তিচ্ছিদম্॥ ২ ॥

যত্ত্রৈলোক্যমহীযসোপি মহিতং সম্মোহনং মোহনাত
    কান্তং কান্তিনিধানতোপি মধুরং মাধুর্যধুর্যাদপি।
সৌন্দর্যোত্তরতোপি সুন্দরতরং ত্বদ্রূপমাশ্চর্যতো-
    প্যাশ্চর্যং ভুৱনে ন কস্য কুতুকং পুষ্ণাতি ৱিষ্ণো ৱিভো॥ ৩ ॥

তত্তাদৃঙমধুরাত্মকং তৱ ৱপুসসম্প্রাপ্য সম্পন্মযী
    সা দেৱী পরমোতসুকা চিরতরং নাস্তে স্বভক্তেষৱপি।
তেনাস্যা বত কষ্টমচ্যুত ৱিভো ত্বদ্রূপমানোজ্ঞক-
    প্রেমস্থৈর্যমযাদচাপলবলাচ্চাপল্যৱার্তোদভূত্॥ ৪ ॥

লক্ষ্মীস্তাৱকরামণীযকহৃতৈৱেযং পরেষৱস্থিরে-
    ত্যস্মিন্নন্যদপি প্রমাণমধুনা ৱক্ষ্যামি লক্ষ্মীপতে।
যে ত্বদধ্যানগুণানুকীর্তনরসাসক্তা হি ভক্তা জনা-
    স্তেষৱেষা ৱসতি স্থিরৈৱ দযিতপ্রস্তাৱদত্তাদরা॥ ৫ ॥

www.prapatti.com

এৱম্ভূতমনোজ্ঞতানৱসুধানিষ্যন্দসন্দোহনং
ত্বদ্রূপং পরচিদ্রসাযনমযং চেতোহরং শৃণ্ৱতাম্।
সদ্যঃ প্রেরযতে মতিং মদযতে রোমাঞ্চযত্যঙ্গকং
ৱ্যাসিঞ্চত্যপি শীতবাষ্পৱিসরৈরানন্দমূর্চ্ছোদ্ভৱৈঃ॥ ৬॥

এৱম্ভূততযা হি ভক্ত্যভিহিতো যোগঃ স যোগদ্বযাত
কর্মজ্ঞানমযাদ্ভৃশোত্তমতরো যোগীশ্বরৈর্গীযতে।
সৌন্দর্যৈকরসাত্মকে ত্বযি খলু প্রেমপ্রকর্ষাত্মিকা
ভক্তির্নিশ্রমমেৱ ৱিশ্বপুরুষৈর্লভ্যা রমাৱল্লভ॥ ৭॥

নিষ্কামং নিযতস্বধর্মচরণং যত্ কর্মযোগাভিধং
তদ্দূরেত্যফলং যদৌপনিষদজ্ঞানোপলভ্যং পুনঃ।
তত্ত্বৱ্যক্ততযা সুদুর্গমতরং চিত্তস্য তস্মাদ্বিভো
ত্বত্প্রেমাত্মকভক্তিরেৱ সততং স্বাদীযসী শ্রেযসী॥ ৮॥

অত্যাযাসকরাণি কর্মপটলান্যাচর্য নির্যন্মলা
বোধে ভক্তিপথেথৱাপ্যুচিততামাযান্তি কিং তাৱতা।
ক্লিষ্ট্ৱা তর্কপথে পরং তৱ ৱপুর্ব্রহ্মাখ্যমন্যে পুন-
শ্চিত্তার্দ্রত্বমৃতে ৱিচিন্ত্য বহুভিঃ সিধ্যন্তি জন্মান্তরৈঃ॥ ৯॥

ত্বদ্ভক্তিস্তু কথারসামৃতঝরীনির্মজ্জনেন স্বযং
সিদ্ধ্যন্তী ৱিমলপ্রবোধপদৱীমক্লেশতস্তন্ৱতী।
সদ্যঃ সিদ্ধিকরী জযত্যযি ৱিভো সৈৱাস্তু মে ত্বত্পদ-
প্রেমপ্রৌঢিরসার্দ্রতা দ্রুততরং ৱাতালযাধীশ্বর॥ ১০॥

**********

www.prapatti.com